श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्री रङ्गनाथदिव्यमणिपादुकाभ्यां नमः

श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य

श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु

श्रीरङ्गनाथपादुकासहस्रे

# ॥ निर्वेदपद्धतिः एकत्रिंशी ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness* *śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्री रङ्गनाथदिव्यमणिपादुकाभ्यां नमः

# ॥ निर्वेदपद्धतिः एकत्रिंशी ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

प्रपद्ये पादुकां देवीं परविद्यामिव स्वयम्।
यामर्पयति दीनानां दयमानो जगद्गुरुः ॥ **31.1** ॥

अपि जन्मनि पादुके ! परस्मिन्
अनघैः कर्मभिरीदृशो भवेयम्।
य इमे विनयेन रङ्गभर्तुः
समये त्वां पदयोः समर्पयन्ति ॥ **31.2** ॥

परिवर्तयिता पितामहादीन्
त्वमिवानन्तमसौ वहत्यनेहा।
अधुनाऽपि न शौरिपादुके ! त्वाम्
अनघालम्बनमभ्युपैति चित्तम् ॥ **31.3** ॥

कमलाध्युषिते निधौ निरीहे
सुलभे तिष्ठति रङ्गकोशमध्ये।
त्वयि तत्प्रतिलम्भने स्थितायां
परमन्विच्छति पादुके ! मनो मे ॥ **31.4** ॥

यद्यप्यहं तरळधीस्तव न स्मरेयं
न स्मर्तुमर्हति कथं भवती स्वयं मे।

वत्से विहारकुतुकं कलयत्यवस्था
    का नाम केशवपदावनि ! वत्सलायाः ॥ 31.5 ॥

मातर्मुकुन्दकरुणामपि निह्नुवानात्
    किं वा परं किमपि किल्बिषतो मदीयात्।
गाढं गृहीतचरणागमनापदेशात्
    तत्प्रेरणप्रणयिनी तव चेन्न लीला ॥ 31.6 ॥

क्षीबाऽसि काञ्चनपदावनि ! कैटभारेः
    पादारविन्दमकरन्दनिषेवणेन।
देवि ! त्वदन्तिकजुषः कथमन्यथा मे
    दीनाक्षराणि न शृणोषि दयाधिका त्वम् ॥ 31.7 ॥

मातस्त्वदर्पितभरस्य मुकुन्दपादे
    भद्रेतराणि यदि नाम भवन्ति भूयः।
कीर्तिः प्रपन्नपरिरक्षणदीक्षितायाः
    किं न त्रपेत तव काञ्चनपादरक्षे ! ॥ 31.8 ॥

दौवारिकद्विरसनप्रबलान्तरायैः
    दूये पदावनि ! दुराढ्यबिलप्रवेशैः।
तद्रङ्गधामनिरपायधनोत्तरायां
    त्वय्येव विश्रमय मङ्क्षु मनोरथं मे ॥ 31.9 ॥

व्यामुह्यतां त्रिविधतापमये निदाघे
    मायाविशेषजनितासु मरीचिकासु।
संस्पृष्टशौरिचरणा चरणावनि ! त्वं
    स्थेया स्वयं भवसि नश्वरमे पुमर्थे ॥ 31.10 ॥

अच्छेद्यया विषयवागुरया निबद्धान्
    दीनान् जनार्दनपदावनि ! सत्पथस्था।

प्रायः क्रमेण भवती परिगृह्य मौळौ
कालेन मोचयति नः कृपया सनाथा ॥ **31.11** ॥

संवाहिका चरणयोर्मणिपादरक्षे !
देवस्य रङ्गवसतेर्दयिता ननु त्वम्।
कस्त्वां निवारयितुमर्हति योजयन्तीं
मातः ! स्वयं गुणगणेषु ममापराधान् ॥ **31.12** ॥

किं वा भविष्यति परं कलुषैकवृत्तेः
एतावताऽप्यनुपजातमनेहसा मे।
एकं तदस्ति यदि पश्यसि पादुके ! ते
पद्मासहायपदपङ्कजभोगसाम्यम् ॥ **31.13** ॥

विविधविषयचिन्तासन्तताभिश्चिरं मां
जनितकलुषमित्थं देवि ! दुर्वासनाभिः।
पदसरसिजयोस्त्वं पादुके रङ्गभर्तुः
परिमळपरिवाहैः पावनैर्वासयेथाः ॥ **31.14** ॥

शरणमधिगतस्त्वां शार्ङ्गिणः पादरक्षे !
सकृदपि विनियुक्तं त्वत्सपर्याधिकारे।
पुनरपि कथमेनं हस्तमुत्तानयेयं
धनमदमुदितानां मानवानां समाजे ॥ **31.15** ॥

यदि किमपि समीहे कर्म कर्तुं यथावत्
प्रतिपदमुपजातैः प्रत्यवेयां निमित्तैः।
अवधिरसि यदि त्वं तत्र नैमित्तिकानां
शरणमिह न किं मे शौरिपादावनि ! स्याः ॥ **31.16** ॥

अन्तर्लीनैरघपरिकरैराविला चित्तवृत्तिः
शब्दादीनां परवशतया दुर्जयानीन्द्रियाणि।

विष्णोः पादप्रणयिनि ! चिरादस्य मे दुःखसिन्धोः
पारं प्राप्यं भवति परया विद्यया वा त्वया वा ॥ **31.17** ॥

गोमायूनां मलयपवने तस्कराणां हिमांशौ
दुर्वृत्तानां सुचरितमये सत्पथे त्वत्सनाथे।
तत्त्वज्ञाने तरळमनसां शार्ङ्गिणः पादरक्षे !
नित्योद्वेगो भवति नियतेरीदृशी दुर्विनीतिः ॥ **31.18** ॥

काले जन्तून् कलुषकरणे क्षिप्रमाकारयन्त्याः
घोरं नाहं यमपरिषदो घोषमाकर्णयेयम्।
श्रीमद्रङ्गेश्वरचरणयोरन्तरङ्गैः प्रयुक्तं
सेवाह्वानं सपदि शृणुयां पादुकासेवकेति ॥ **31.19** ॥

पाषाणकल्पमन्ते परिचितगौतमपरिग्रहन्यायात्।
पतिपदपरिचरणार्हं परिणमय मुकुन्दपादरक्षिणि ! माम् ॥ **31.20** ॥

॥ इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
श्रीरङ्गनाथपादुकासहस्रे निर्वेदपद्धतिः एकत्रिंशी ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥